

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## द्वितीयकाण्डे द्वितीयः प्रश्नः

### इष्टिविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्रजापतिः प्रजा असृजत ताः सृष्टा इन्द्राग्नी अपागूहताꣳ सोऽचायत् प्रजापतिरिन्द्राग्नी वै मे प्रजा अपाघुख्षतामिति स एतमैन्द्राग्न मेकादशकपालमपश्यत् तन्निरवपत् तावस्मै प्रजाः प्रासाधयतामिन्द्राग्नी वा एतस्य प्रजामप गूहतो योऽलम्प्रजायै सन् प्रजान्न विन्दत ऐन्द्राग्न मेकादशकपालन्निर्वपेत्प्रजाकाम इन्द्राग्नी ॥ [१] ॥ एव स्वेन भागधेयेनोप धावति तावेवास्मै प्रजाम्प्र साधयतो विन्दते प्रजामैन्द्राग्न मेकादशकपालन्निर्वपेथ् स्पर्द्धमानः ख्षेत्रे वा सजातेषु वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति ताभ्यामेवेन्द्रियँव्वीर्यम्भ्रातृव्यस्य वृङ्क्ते वि पाप्मना भ्रातृव्येण जयतेऽप वा एतस्मादिन्द्रियँव्वीर्यङ्क्रामति यः संग्राममुपप्रयात्यैन्द्राग्न मेकादशकपालन्निर् ॥ [२] ॥ वपेथ् संग्राममुपप्रयास्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियँव्वीर्यन्धत्तः सहेन्द्रियेण वीर्येणोप प्र याति जयति तꣳ संग्रामव्वि वा एष इन्द्रियेण वीर्येणर्द्ध्यते यः संग्रामञ्जयत्यैन्द्राग्नमेकादशकपालन्निर्वपेथ् संग्रामञ्जित्वेन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियँव्वीर्यं ॥ [३] ॥ धत्तो नेन्द्रियेण वीर्येण व्यृद्ध्यतेऽप वा एतस्मादिन्द्रियँव्वीर्यङ्क्रामति य एति जनतामैन्द्राग्न मेकादशकपालन्निर्वपेज्जनतामेष्यन्निन्द्राग्नी एव स्वेन भागधेयेनोप धावति तावेवास्मिन्निन्द्रियँव्वीर्यन्धत्तः सहेन्द्रियेण वीर्येण जनतामेति पौष्णञ्चरुमनु निर्वपेत् पूषा वा इन्द्रियस्य वीर्यस्यानुप्रदाता पूषणमेव ॥ [४] ॥ स्वेन भागधेयेनोप धावति स एवास्मा इन्द्रियँव्वीर्यमनु प्र यच्छति ख्षैत्रपत्यञ्चरुन्निर्वपेज्जनतामागत्येयँव्वै

ख्षेत्रस्य पतिरस्यामेव प्रति तिष्ठत्यैन्द्राग्नमेकादशकपालमुपरिष्टान्निर्वपेदस्यामेव प्रतिष्ठायेन्द्रियं वीर्यमुपरिष्टादात्मन् धत्ते ॥ [५] ॥

(प्रजाकाम इन्द्राग्नी उपप्रयात्यैन्द्राग्न मेकादशकपालन्निर् वीर्यं पूषणमे वै कान्नचत्वारिꣳशच्च) ॥ १ ॥

अग्नये पथिकृते पुरोडाशमष्टाकपालन्निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्याँव्वा पौर्णमासीँव्वाऽतिपादयेत् पथो वा एषोऽद्ध्यपथेनैति यो दर्शपूर्णमासयाजी सन्नमावास्याँव्वा पौर्णमासीँव्वाऽतिपादयत्यग्निमेव पथिकृतꣳ स्वेन भागधेयेनोप धावति स एवैनमपथात् पन्थामपि नयत्यनड्वान् दख्षिणा वही ह्येष समृद्ध्या अग्नये व्रतपतये ॥ [६] ॥ पुरोडाशमष्टाकपालन्निर्वपेद्य आहिताग्निः सन्नव्रत्यमिव चरेदग्निमेव व्रतपतिꣳ स्वेन भागधेयेनोप धावति स एवैनँव्व्रतमा लम्भयति व्रत्यो भवत्यग्नये रख्षोघ्ने पुरोडाशमष्टाकपालन्निर्वपेद्यꣳ रख्षाꣳसि सचेरन्नग्निमेव रख्षोहणꣳ स्वेन भागधेयेनोप धावति स एवास्माद्रख्षाꣳस्यप हन्ति निशितायान्निर्वपे ॥ [७] ॥ न्निशितायाꣳ हि रख्षाꣳसि प्रेरते संप्रेर्णान्येवैनानि हन्ति परिश्रिते याजयेद्रख्षसामनन्ववचाराय रख्षोघ्नी याज्यानुवाक्ये भवतो रख्षसाꣳ स्तृत्या अग्नये रुद्रवते पुरोडाशमष्टाकपालन्निर्वपेदभिचरन्नेषा वा अस्य घोरा तनूर् यद् रुद्रस्तस्मा एवैनमा वृश्चति ताजगार्तिमार्च्छत्यग्नये सुरभिमते पुरोडाशमष्टाकपालन्निर्वपेद्यस्य गावो वा पुरुषा ॥ [८] ॥ वा प्रमीयेरन्यो वा बिभीयादेषा वा अस्य भेषज्या तनूर् यथ् सुरभिमती तयैवास्मै भेषजं करोति सुरभिमते भवति पूतीगन्धस्यापहत्या अग्नये ख्षामवते पुरोडाशमष्टाकपालन्निर्वपेथ् संग्रामे सय्ँयत्ते भागधेयेनैवैनꣳ शमयित्वा परानभि निर्दिशति यमवरेषाव्विँद्ध्यन्ति जीवति स यम्परेषाम्प्र स मीयते जयति तꣳ संग्राम ॥ [९] ॥ मभि वा एष एतानुच्यति येषाम्पूर्वापरा अन्वञ्चः प्रमीयन्ते पुरुषाहुतिर् ह्यस्य प्रियतमाऽग्नये ख्षामवते पुरोडाशमष्टाकपालन्निर्वपेद् भागधेयेनैवैनꣳ शमयति नैषाम्पुराऽऽ*युषोऽपरः प्र मीयतेऽभि वा एष एतस्य गृहानुच्यति यस्य गृहान् दहत्यग्नये ख्षामवते पुरोडाशमष्टाकपालन्निर्वपेद् भागधेयेनैवैनꣳ शमयति ना स्यापरङ्गृहान् दहति ॥ [१०] ॥

(व्रतपतये निशितायान्निर्वपेत् पुरुषाः संग्रामं न चत्वारि च) ॥ २ ॥

अग्नये कामाय पुरोडाशमष्टाकपालन्निर्वपेद्यङ्कामो नोपनमेदग्निमेव कामङ्ँ स्वेन भागधेयेनोप धावति स एवैनङ्कामेन समर्द्धयत्युपैनङ्कामो नमत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालन्निर्वपेथ् स्पर्द्धमानः क्षेत्रे वा सजातेषु वाऽग्निमेव यविष्ठङ्ँ स्वेन भागधेयेनोप धावति तेनैवेन्द्रियव्ँवी-र्यम्भ्रातृव्यस्य ॥ [११] ॥ युवते वि पाप्मना भ्रातृव्येण जयतेऽग्नये यविष्ठाय पुरोडाशमष्टा-कपालन्निर्वपेद् भिचर्यमाणोऽग्निमेव यविष्ठङ्ँ स्वेन भागधेयेनोप धावति स एवास्माद्रक्षाꣳसि यवयति नैनमभिचरन्थ् स्तृणुतेऽग्नय आयुष्मते पुरोडाशमष्टाकपालन्निर्वपेद्यः कामयेत सर्वमा-युरियामित्यग्निमेवाऽऽ*युष्मन्तङ्ँ स्वेन भागधेयेनोप धावति स एवास्मि ॥ [१२] ॥ न्नायुर् दधाति सर्वमायुरेत्यग्नये जातवेदसे पुरोडाशमष्टाकपालन्निर्वपेद्भूतिकामोऽग्निमेव जातवेदसङ्ँ स्वेन भागधेयेनोप धावति स एवैनम्भूतिङ्गमयति भवत्येवाग्नये रुक्मते पुरोडाशमष्टाकपाल-न्निर्वपेद्रुक्कामोऽग्निमेव रुक्मन्तङ्ँ स्वेन भागधेयेनोप धावति स एवास्मिन् रुचन्दधाति रोचत एवाग्नये तेजस्वते पुरोडाश ॥ [१३] ॥ मष्टाकपालन्निर्वपेत् तेजस्कामोऽग्निमेव तेजस्वन्तङ्ँ स्वेन भागधेयेनोप धावति स एवास्मिन् तेजो दधाति तेजस्व्येव भवत्यग्नये साहन्त्याय पुरो-डाशमष्टाकपालन्निर्वपेथ् सीक्षमाणोऽग्निमेव साहन्त्यङ्ँ स्वेन भागधेयेनोप धावति तेनैव सहते यꣳ सीक्षते ॥ [१४] ॥

(भ्रातृव्यस्या स्मिन् तेजस्वते पुरोडश मष्टात्रिꣳशच्च) ॥ ३ ॥

अग्नयेऽन्नवते पुरोडाशमष्टाकपालन्निर्वपेद्यः कामयेतान्नवान्थ्स्यामित्यग्निमेवान्नवन्तङ्ँ स्वेन भागधेयेनोप धावति स एवैनमन्नवन्तङ्करोत्यन्नवानेव भवत्यग्नयेऽन्नादाय पुरोडाशमष्टाकपाल-न्निर्वपेद्यः कामयेतान्नादः स्यामित्यग्नि मेवान्नादङ्ँ स्वेन भागधेयेनोप धावति स एवैनमन्नाद-ङ्करोत्यन्नाद ॥ [१५] ॥ एव भवत्यग्नयेऽन्नपतये पुरोडाशमष्टाकपालन्निर्वपेद्यः कामयेतान्न-पतिः स्यामित्यग्नि मेवान्नपतिङ्ँ स्वेन भागधेयेनोप धावति स एवैनमन्नपतिङ्करोत्यन्नपतिरेव भवत्यग्नये पवमानाय पुरोडाशमष्टाकपालन्निर्वपेदग्नये पावकायाग्नये शुचये ज्योगामयावी यद-ग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये ॥ [१६] ॥ पावकाय वाचमे-वास्मिन् तेन दधाति यदग्नये शुचय आयुरेवास्मिन् तेन दधात्युत यदीतासुर् भवति जीवत्ये-

वैतामेव निर्वपेच्चक्षुष्कामो यदग्नये पवमानाय निर्वपति प्राणमेवास्मिन् तेन दधाति यदग्नये पावकाय वाचमेवास्मिन् तेन दधाति यदग्नये शुचये चक्षुरेवास्मिन् तेन दधा ॥ [१७] ॥ त्युत यद्यन्धो भवति प्रैव पश्यत्यग्नये पुत्रवते पुरोडाशमष्टाकपालन्निर्वपेदिन्द्राय पुत्रिणे पुरोडाशमेकादशकपालम्प्रजाकामोऽग्निरेवास्मै प्रजाम्प्रजनयति वृद्धामिन्द्रः प्र यच्छत्यग्नये रसवतेऽजक्षीरे चरुन्निर्वपेद्यः कामयेत रसवान्थ्स्यामित्यग्निमेव रसवन्तꣳ स्वेन भागधेयेनोप धावति स एवैनꣳ रसवन्तङ्करोति ॥ [१८] ॥ रसवानेव भवत्यजक्षीरे भवत्याग्नेयी वा एषा यदजा साक्षादेव रसमव रुन्धेऽग्नये वसुमते पुरोडाशमष्टाकपालन्निर्वपेद्यः कामयेत वसुमान्थ्स्यामित्यग्निमेव वसुमन्तꣳ स्वेन भागधेयेनोप धावति स एवैनँव्वसुमन्तङ्करोति वसुमानेव भवत्यग्नये वाजसृते पुरोडाशमष्टाकपालन्निर्वपेथ् संग्रामे सय्ँयत्ते वाज ॥ [१९] ॥ व्वा एष सिसीर्षति यः संग्राममञ्जिगीषत्यग्निः खलु वै देवानाँव्वाजसृदग्निमेव वाजसृतꣳ स्वेन भागधेयेनोप धावति धावति वाजꣳ हन्ति वृत्रञ्जयति तꣳ संग्राममथो अग्निरिव न प्रतिधृषे भवत्यग्नयेऽग्निवते पुरोडाशमष्टाकपालन्निर्वपेद्यस्याग्नावग्निमभ्युद्धरेयुर् निर्दिष्टभागो वा एतयोरन्योऽनिर्दिष्टभागोऽन्यस्तौ संभवन्तौ यजमान ॥ [२०] ॥ मभि सम्भवतः स ईश्वर आर्तिमार्तोर् यदग्नयेऽग्निवते निर्वपति भागधेयेनैवैनौ शमयति नाऽऽ*र्तिमार्च्छति यजमानोऽग्नये ज्योतिष्मते पुरोडाशमष्टाकपालन्निर्वपेद् यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्वायेदपर आदीप्यानूद्धृत्य इत्याहुस्तत् तथा न कार्यँय्यद् भागधेयमभि पूर्व उद्ध्रियते किमपरोऽभ्यु ॥ [२१] ॥ द्ध्रियेतेति तान्येवावक्षाणानि सन्निधाय मन्थेदितः प्रथमञ्जज्ञे अग्निः स्वाद्योनेरधि जातवेदाः। स गायत्रिया त्रिष्टुभा जगत्या देवेभ्यो हव्यँव्वहतु प्रजानन्निति छन्दोभिरेवैनꣳ स्वाद्योनेः प्र जनयत्येष वाव सोऽग्निरित्याहुर् ज्योतिस्त्वा अस्य परापतितमिति यदग्नये ज्योतिष्मते निर्वपति यदेवास्य ज्योतिः परापतितन्तदेवाव रुन्धे ॥ [२२] ॥

(करोत्यन्नादो दधाति यदग्नये शुचये चक्षुरेवास्मिन् तेन दधाति करोति वाजं यजमान मु देवास्य षड्) ॥ ४ ॥

वैश्वानरन्द्वादशकपालन्निर्वपेद्वारुणञ्चरुन्दधिक्रावण्णे चरुमभिशस्यमानो यद्वैश्वानरो द्वादशकपालो भवति सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरेणैवैनꣳ स्वदयत्यप पापँव्वर्णꣳ हते

वारुणेनैवैनँव्वरुणपाशान् मुञ्चति दधिक्राव्ण्णा पुनाति हिरण्यन्दक्षिणा पवित्रँव्वै हिरण्यम्पुनात्येवैनमाद्यमस्यान्नम्भवत्येतामेव निर्वपेत् प्रजाकामः सँव्वथ्सरो ॥ [२३] ॥ वा एतस्याशान्तो योनिम्प्रजायै पशूनान्निर्दहति योऽलम्प्रजायै सन् प्रजान्न विन्दते यद्वैश्वानरो द्वादशकपालो भवति सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरमेव भागधेयेन शमयति सोऽस्मै शान्तः स्वाद्योनेः प्रजाम्प्र जनयति वारुणेनैवैनँव्वरुणपाशान् मुञ्चति दधिक्राव्ण्णा पुनाति हिरण्यन्दक्षिणा पवित्रं वै हिरण्यम्पुनात्येवैन ॥ [२४] ॥ विँन्दते प्रजाँव्वैश्वानरन्द्वादशकपालन्निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनम्ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिन् तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यन्दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियन्दधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिन् जात एतामिष्टिन्निर्वपति पूत ॥ [२५] ॥ एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवत्यव वा एष सुवर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन्नमावास्याँव्वा पौर्णमासीँव्वाऽतिपादयति सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते वैश्वानरन्द्वादशकपालन्निर्वपेदमावास्याँव्वा पौर्णमासीं वाऽतिपाद्य सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरमेव प्रीणात्यथो सँव्वथ्सरमेवास्मा उप दधाति सुवर्गस्य लोकस्य समष्ट्या ॥ [२६] ॥ अथो देवता एवान्वारभ्य सुवर्गँल्लोकमेति वीरहा वा एष देवानाँय्योऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः पुराऽन्नमक्षन्नाग्नेयमष्टाकपालन्निर्वपेद्वैश्वानरन्द्वादशकपालमग्निमुद्वासयिष्यन् यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तस्मा आतिथ्यङ्करोत्यथो यथा जनँय्यतेऽवसङ्करोति तादृ ॥ [२७] ॥ गेव तद्द्वादशकपालो वैश्वानरो भवति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरः खलु वा अग्नेर् योनिः स्वामेवैनँय्योनिङ्गमयत्याद्यमस्यान्नम्भवति वैश्वानरन्द्वादशकपालन्निर्वपेन्मारुतꣳ सप्तकपालङ्ग्रामकाम आहवनीये वैश्वानरमधि श्रयति गार्हपत्ये मारुतम्पापवस्यसस्य विधृत्यै द्वादशकपालो वैश्वानरो भवति द्वादश मासाः सँव्वथ्सरः सँव्वथ्सरेणैवास्मै सजाताꣳश्च्यावयति मारुतो भवति ॥ [२८] ॥ मरुतो वै देवानाँव्विशो देवविशेनैवास्मै मनुष्यविशमव रुन्धे सप्तकपालो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धेऽनूच्यमान आ सादयति विशमेवास्मा अनुवर्त्मानङ्करोति ॥ [२९] ॥

(त्येकान्न त्रिꣳशच्च) ॥ ५ ॥

आदित्यञ्चरुन्निर्वपेथ् संग्राममुपप्रयास्यन्नियवँ्वा अदितिरस्यामेव पूर्वे प्रति तिष्ठन्ति वैश्वानन्द्वादशकपालन्निर्वपेदायतनङ्गत्वा सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरः खलु वै देवानामायतनमेतस्माद्वा आयतनाद्देवा असुरानजयन्यद्वैश्वानरन्द्वादशकपालन्निर्वपति देवानामेवाऽऽयतने यतते जयति तꣳ संग्राममेतस्मिन् वा एतौ मृजाते ॥ [३०] ॥ यो विद्विषाणयोरन्नमत्ति वैश्वानरन्द्वादशकपालन्निर्वपेद्विद्विषाणयोरन्नञ्जग्ध्वा सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरस्वदितमेवात्ति नास्मिन् मृजाते सँव्वथ्सराय वा एतौ सममाते यौ सममाते तयोर् यः पूर्वोऽभिद्रुह्यति तवँ्वरुणो गृह्णाति वैश्वानरन्द्वादशकपालन्निर्वपेथ् सममानयोः पूर्वोऽभिद्रुह्य सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरमेवाऽऽ*प्त्वा निर्वरुणं ॥ [३१] ॥ परस्तादभि द्रुह्यति नैनवँ्वरुणो गृह्णात्यावँव्वा एष प्रति गृह्णाति योऽविम्प्रतिगृह्णाति वैश्वानरन्द्वादशकपालन्निर्वपेदविम्प्रतिगृह्य सँव्वथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरस्वदितामेव प्रति गृह्णाति नाऽऽ*व्यम्प्रति गृह्णात्यात्मनो वा एष मात्रामाप्नोति य उभयादत् प्रतिगृह्णात्यश्ववँ्वा पुरुषवँ्वा वैश्वानरन्द्वादशकपालन्निर्वपेदुभयादत् ॥ [३२] ॥ प्रतिगृह्य संवथ्सरो वा अग्निर् वैश्वानरः सँव्वथ्सरस्वदितमेव प्रति गृह्णाति नात्मनो मात्रामाप्नोति वैश्वानरन्द्वादशकपालन्निर्वपेथ्सनिमेष्यन्थ्सँव्वथ्सरो वा अग्निर् वैश्वानरो यदा खलु वै सँव्वथ्सरञ्जनतायाञ्चरत्यथ स धनार्घो भवतियद्वैश्वानरन्द्वादशकपालन्निर्वपति सँव्वथ्सरसातामेव सनिमभि प्र च्यवते दानकामा अस्मै प्रजा भवन्ति यो वै सँव्वथ्सरं ॥ [३३] ॥ प्रयुज्य न विमुञ्चत्यप्रतिष्ठानो वै स भवत्येतमेव वैश्वानरम्पुनरागत्य निर्वपेद्यमेव प्रयुङ्क्ते तम्भागधेयेन वि मुञ्चति प्रतिष्ठित्यै यया रज्वोत्तमाङ्गामाजेत् ताम्भ्रातृव्याय प्र हिणुयान्निरृत्तिमेवास्मै प्र हिणोति ॥ [३४] ॥

(मृजाते निर्वरुणं वपेदुभयादद् यो वै सँव्वथ्सरꣳ षड्विꣳशच्च) ॥ ६ ॥

ऐन्द्रञ्चरुन्निर्वपेत् पशुकाम ऐन्द्रा वै पशव इन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मै पशून् प्र यच्छति पशुमानेव भवति चरुर् भवति स्वादेवास्मै योनेः पशून् प्र जनयतीन्द्रायेन्द्रि-

यावते पुरोडाशमेकादशकपालन्निर्वपेत् पशुकाम इन्द्रियव्ँवै पशव इन्द्रमेवेन्द्रियावन्तꣳ स्वेन भागधेयेनोप धावति स ॥ [३५] ॥ एवास्मा इन्द्रियम्पशून् प्र यच्छति पशुमानेव भवतीन्द्राय घर्मवते पुरोडाशमेकादशकपालन्निर्वपेद्ब्रह्मवर्चसकामो ब्रह्मवर्चसव्ँवै घर्म इन्द्रमेव घर्मवन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन् ब्रह्मवर्चसन्दधाति ब्रह्मवर्चस्येव भवतीन्द्रायार्कवते पुरोडाश मेकादशकपालन्निर्वपेदन्नकामोऽर्को वै देवाना मन्नमिन्द्रमेवार्कवन्तꣳ स्वेन भागधे-येनो ॥ [३६] ॥ प धावति स एवास्मा अन्नम्प्र यच्छत्यन्नाद एव भवतीन्द्राय घर्मवते पुरोडा-शमेकादशकपालन्निर्वपेदिन्द्रायेन्द्रियावत इन्द्रायाऽर्कवते भूतिकामो यदिन्द्राय घर्मवते निर्वपति शिर एवास्य तेन करोति यदिन्द्रायेन्द्रियावत आत्मानमेवास्य तेन करोति यदिन्द्रायाऽर्कवते भूत एवान्नाद्ये प्रति तिष्ठति भवत्येवेन्द्राया ॥ [३७] ॥ ऽꣳहोमुचे पुरोडाशमेकादशकपालन्निर्वपेद्यः पाप्मना गृहीतः स्यात् पाप्मा वा अꣳह इन्द्रमेवाऽꣳहोमुचꣳ स्वेन भागधेयेनोप धावति स एवै-नम्पाप्मनोऽꣳहसो मुञ्चतीन्द्राय वैमृधाय पुरोडाशमेकादशकपालन्निर्वपेद्यम्मृधोऽभि प्रवेपेरन्रा-ष्ट्राणि वाऽभि समियुरिन्द्रमेव वैमृधꣳ स्वेन भागधेयेनोप धावति स एवास्मान्मृधो ॥ [३८] ॥ ऽप हन्तीन्द्राय त्रात्रे पुरोडाशमेकादशकपालन्निर्वपेद्बद्धो वा परियत्तो वेन्द्रमेव त्रातारꣳ स्वेन भागधेयेनोप धावति स एवैनन्त्रायत इन्द्रायार्काश्वमेधवते पुरोडाशमेकादशकपालन्निर्वपेद्यम्म-हायज्ञो नोपनमेदेते वै महायज्ञस्यान्त्ये तनू यदर्काश्वमेधाविन्द्रमेवार्काश्वमेधवन्तꣳ स्वेन भाग-धेयेनोप धावति स एवास्मा अन्ततो महायज्ञञ्च्यावयत्युपैनम्महायज्ञो नमति ॥ [३९] ॥

(इन्द्रियावन्तꣳ स्वेन भागधेयेनोप धावति सो ऽर्कवन्तꣳ स्वेन भागधेयेन वेन्द्राया स्मान् मृधो ऽस्मै सप्त च) ॥ ७ ॥

⋆

इन्द्रायान्वृजवे पुरोडाशमेकादशकपालन्निर्वपेद् ग्रामकाम इन्द्रमेवान्वृजुꣳ स्वेन भागधे-येनोप धावति स एवास्मै सजातानननुकान् करोति ग्राम्येव भवतीन्द्राण्यै चरुन्निर्वपेद्यस्य सेनाऽसꣳशितेव स्यादिन्द्राणी वै सेनायै देवतेन्द्राणीमेव स्वेन भागधेयेनोप धावति सैवास्य सेनाꣳ सꣳ श्यति बलꣳजानपी ॥ [४०] ॥ दध्मे सन्नह्येद्गौर्यत्राधिष्कन्ना न्यमेहत् ततो बलꣳजा उदतिष्ठन् गवामेवैनन्न्यायमपिनीय गा वेदयतीन्द्राय मन्युमते मनस्वते पुरोडाशमे-कादशकपालन्निर्वपेथ् संग्रामे सय्ँयत्त इन्द्रियेण वै मन्युना मनसा संग्राममञ्जयतीन्द्रमेव मन्यु-

मन्तम्मनस्वन्तꣳ स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियम्मन्युम्मनो दधाति जयति
तꣳ ॥ [४१] ॥ संग्राममेतामेव निर्वपेद्यो हतमनाः स्वयंपाप इव स्यादेतानि हि वा एतस्माद-
पक्रान्तान्यथैष हतमनाः स्वयंपाप इन्द्रमेव मन्युमन्तम्मनस्वन्तꣳ स्वेन भागधेयेनोप धावति
स एवास्मिन्निन्द्रियम्मन्युम्मनो दधाति न हतमनाः स्वयम्पापो भवतीन्द्राय दात्रे पुरोडाश-
मेकादशकपालन्निर्वपेद्यः कामयेत दानकामा मे प्रजाः स्यु ॥ [४२] ॥ रितीन्द्रमेव दातारꣳ
स्वेन भागधेयेनोप धावति स एवास्मै दानकामाः प्रजाः करोति दानकामा अस्मै प्रजा भवन्ती-
न्द्राय प्रदात्रे पुरोडाशमेकादशकपालन्निर्वपेद्यस्मै प्रत्तमिव सन्न प्रदीयेतेन्द्रमेव प्रदातारꣳ स्वेन
भागधेयेनोप धावति स एवास्मै प्र दापयतीन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालन्निर्वपेदपरुद्धो
वा ॥ [४३] ॥ ऽपरुद्ध्यमानो वेन्द्रमेव सुत्रामाणꣳ स्वेन भागधेयेनोप धावति स एवैनन्त्रा-
यते ऽनपरुद्ध्यो भवतीन्द्रो वै सदृङ् देवताभिरासीथ् स न व्यावृतमगच्छथ् स प्रजापतिमुपा-
धावत् तस्मा एतमैन्द्रमेकादशकपालन्निरवपत् तेनैवास्मिन्निन्द्रियमदधाच्छक्करी याज्यानुवाक्ये
अकरोद् वज्रो वै शक्करी स एनँव्वज्रो भूत्वा ऐन्ध ॥ [४४] ॥ सोऽभवथ् सोऽबिभेद्भूतः प्र मा
धक्ष्यतीति स प्रजापतिम्पुनरुपाधावथ् स प्रजापतिः शक्कर्या अधि रेवतीन्निरमिमीत शान्त्या
अप्रदाहाय योऽलꣳ श्रियै सन्थ्सदृङ्ख्समानैः स्यात् तस्मा एतमैन्द्रमेकादशकपालन्निर्वपेदि-
न्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियन्दधाति रेवती पुरोनुवाक्या भवति शान्त्या
अप्रदाहाय शक्करी याज्या वज्रो वै शक्करी स एनँव्वज्रो भूत्वा इन्धे भवत्येव ॥ [४५] ॥

(अपि तꣳ स्युर् वै न्ध भवति चतुर्दश च।) ॥ ८ ॥

आग्नावैष्णवमेकादशकपालन्निर्वपेदभिचरन्थ्सरस्वत्याज्यभागा स्याद्बार्हस्पत्यश्चरुर् यदा-
ग्नावैष्णव एकादशकपालो भवत्यग्निः सर्वा देवता विष्णुर् यज्ञो देवताभिश्चैवैनँय्यज्ञेन चाभि
चरति सरस्वत्याज्यभागा भवति वाग्वै सरस्वती वाचैवैनमभि चरति बार्हस्पत्य श्चरुर् भवति
ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवैनमभि चरति ॥ [४६] ॥ प्रति वै परस्तादभिचरन्तमभि
चरन्ति द्वेद्वे पुरोनुवाक्ये कुर्यादति प्रयुक्त्या एतयैव यजेताभिचर्यमाणो देवताभिरेव देवताः प्रति-
चरति यज्ञेन यज्ञँव्वाचा वाचम्ब्रह्मणा ब्रह्म स देवताश्चैव यज्ञश्च मद्ध्यतो व्यवसर्पति तस्य न

कुतश्चनोपाव्याधो भवति नैनमभिचरन्थ्स्तृणुत आग्नावैष्णवमेकादशकपालन्निर्वपेद्यय्यँज्ञो नो ॥ [४७] ॥ पनमेदग्निः सर्वा देवता विष्णुर् यज्ञोऽग्निञ्चैव विष्णुञ्च स्वेन भागधेयेनोप धावति तावेवास्मै यज्ञम्प्र यच्छत उपैनय्यँज्ञो नमत्याग्नावैष्णवङ्घृते चरुन्निर्वपेच्चक्षुष्कामो ऽग्नेर् वै चक्षुषा मनुष्या वि पश्यन्ति यज्ञस्य देवा अग्निञ्चैव विष्णुञ्च स्वेन भागधेयेनोप धावति तावेवा ॥ [४८] ॥ ऽस्मिन् चक्षुर् धत्तश्चक्षुष्मानेव भवति धेन्वै वा एतद्रेतो यदाज्यमनडुहस्तण्डुला मिथुनादेवास्मै चक्षुः प्र जनयति घृते भवति तेजो वै घृतन्तेजश्चक्षुस्तेजसैवास्मै तेजश्च-क्षुरव रुन्ध इन्द्रियवँवै वीर्यवँवृङ्क्ते भ्रातृव्यो यजमानोऽयजमानस्याद्ध्वरकल्पाम्प्रति निर्वपेद्भ्रा-तृव्ये यजमाने नास्येन्द्रिय ॥ [४९] ॥ वँवीर्यवँवृङ्क्ते पुरा वाचः प्रवदितोर् निर्वपेद्यावत्येव वाक् तामप्रोदिताम्भ्रातृव्यस्य वृङ्क्ते तामस्य वाचम्प्रवदन्तीमन्या वाचोऽनु प्रवदन्ति ता इन्द्रियवँवी-र्यय्यँजमाने दधत्याग्नावैष्णवमष्टाकपालन्निर्वपेत् प्रातस्सवनस्याऽऽ* काले सरस्वत्याज्यभागा स्याद् बार्हस्पत्यश्चरुर्यदष्टाकपालो भवत्यष्टाक्षरा गायत्री गायत्रम्प्रातस्सवनं प्रातस्सवनमे-वतेनाप्नो ॥ [५०] ॥ त्याग्नावैष्णवमेकादशकपालन्निर्वपेन्माद्ध्यन्दिनस्य सवनस्याऽऽ*काले सरस्वत्याज्यभागा स्याद् बार्हस्पत्यश्चरुर् यदेकादशकपालो भवत्येकादशाक्षरा त्रिष्टुप् त्रैष्टु-भम्माद्ध्यन्दिनꣳ सवनम्माद्ध्यन्दिनमेव सवनन्तेनाऽऽ*प्नोत्याग्नावैष्णवन्द्वादशकपालन्निर्वपेत् तृतीयसवनस्याऽऽ*काले सरस्वत्याज्यभागा स्याद् बार्हस्पत्यश्चरुर् यद्वादशकपालो भवति द्वादशाक्षरा जगती जागतन्तृतीयसवनन्तृतीयसवनमेव तेनाऽऽप्नोति देवताभिरेव देवताः ॥ [५१] ॥ प्रतिचरति यज्ञेन यज्ञव्वाँचा वाचम्ब्रह्मणा ब्रह्म कपालैरेव छन्दाꣳस्याप्नोति पुरो-डाशैः सवनानि मैत्रावरुणमेककपालन्निर्वपेद्वशायै काले यैवासौ भ्रातृव्यस्य वशाऽनूबन्ध्या सो एवैषैतस्यैककपालो भवति न हि कपालैः पशुमर्हत्याप्तुम् ॥ [५२] ॥

(ब्रह्मणैवैनमभि चरति यज्ञो न तावेवा ऽस्येन्द्रिय माप्नोति देवताः सप्तत्रिꣳशच्च) ॥ ९ ॥

असावादित्यो न व्यरोचत तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्मा एतꣳ सौमारौद्रञ्चरुन्निरवपन् तेनैवास्मिन् रुचमदधुर्यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सौमारौद्रं चरुन्निर्वपेथ् सोमञ्चैव रुद्रञ्च स्वेन भागधेयेनोप धावति तावेवास्मिन् ब्रह्मवर्चसं धत्तो ब्रह्मवर्चस्येव भवति तिष्या-

पूर्णमासे निर्वपेद्रुद्रो ॥ [५३] ॥ वै तिष्यः सोमः पूर्णमासः साक्षादेव ब्रह्मवर्चसमव रुन्धे परिश्रिते याजयति ब्रह्मवर्चसस्य परिगृहीत्यै श्वेतायै श्वेतवत्सायै दुग्धम्मथितमाज्यम्भवत्याज्यं प्रोक्षणमाज्येन मार्जयन्ते यावदेव ब्रह्मवर्चसन्तथ् सर्वङ्करोत्यति ब्रह्मवर्चसङ्क्रियत इत्याहुरीश्वरो दुश्चर्मा भवितोरिति मानवी ऋचौ धाय्ये कुर्याद्यद्वै किञ्च मनुरवदत्तद् भेषजं ॥ [५४] ॥ भेषजमेवास्मै करोति यदि बिभीयाद्दुश्चर्मा भविष्यामीति सोमापौष्णञ्चरुन्निर्वपेथ् सौम्यो वै देवतया पुरुषः पौष्णाः पशवः स्वयैवास्मै देवतया पशुभिस्त्वचङ्करोति न दुश्चर्मा भवति सोमारौद्रञ्चरुन्निर्वपेत् प्रजाकामः सोमो वै रेतोधा अग्निः प्रजानाम्प्रजनयिता सोम एवास्मै रेतो दधात्यग्निः प्रजाम्प्र जनयति विन्दते ॥ [५५] ॥ प्रजाꣳ सोमारौद्रञ्चरुन्निर्वपेदभिचरन्थ्सौम्यो वै देवतया पुरुष एष रुद्रो यदग्निः स्वाया एवैनन्देवतायै निष्क्रीय रुद्रायापि दधाति ताजगार्तिमार्च्छति सोमारौद्रञ्चरुन्निर्वपे ज्योगामयावी सोमँव्वा एतस्य रसो गच्छत्यग्निꣳ शरीरँय्यस्य ज्योगामयति सोमादेवास्य रसन्निष्क्रीणात्यग्नेः शरीरमुत यदी ॥ [५६] ॥ तासुर् भवति जीवत्येव सोमारुद्रयोर् वा एतङ्ग्रसितꣳ होता निष्खिदति स ईश्वर आर्तिमार्तोरनड्वान्होत्रा देयो वह्निर् वा अनड्वान् वह्निर्होता वह्निनैव वह्निमात्मानꣳ स्पृणोति सोमारौद्रञ्चरुन्निर्वपेद्यः कामयेत स्वेऽस्मा आयतने भ्रातृव्यञ्जनयेयमिति वेदिं परिगृह्यार्द्धमुद्धन्यादर्द्धन्नार्द्धम्बर्हिषः स्तृणीयादर्द्धन्नार्द्धमिध्मस्याभ्यादध्यादर्द्धन्न स्व एवास्मा आयतने भ्रातृव्यञ्जनयति ॥ [५७] ॥

(रुद्रो भेषजं विन्दते यदि स्तृणीयादर्द्धं द्वादश च) ॥ १० ॥

ऐन्द्रमेकादशकपालन्निर्वपेन्मारुतꣳ सप्तकपालङ्ग्रामकाम इन्द्रञ्चैव मरुतश्च स्वेन भागधेयेनोप धावति त एवास्मै सजातान्प्र यच्छन्ति ग्राम्येव भवत्याहवनीय ऐन्द्रमधि श्रयति गार्हपत्ये मारुतम्पापवस्यसस्य विधृत्यै सप्तकपालो मारुतो भवति सप्तगणा वै मरुतो गणश एवास्मै सजातानव रुन्धेऽनूच्यमान आ सादयति विशमेवा ॥ [५८] ॥ स्मा अनुवर्त्मानङ्करोत्येतामेव निर्वपेद्यः कामयेत क्षत्राय च विशे च समदं दध्यामित्यैन्द्रस्यावद्यन् ब्रूयादिन्द्रायानु ब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति मारुतस्यावद्यन् ब्रूयान्मरुद्भ्योऽनु ब्रूहीत्याश्राव्य ब्रूयादिन्द्रँय्यजेति स्व एवैभ्यो भागधेये समदन्दधाति वितृꣳहाणास्तिष्ठन्त्येतामेव ॥ [५९] ॥ निर्वपेद्यः काम-

येत कल्पेरन्निति यथादेवतमवदाय यथादेवतँय्यजेद्भागधेयेनैवैनान्यथायथङ्कल्पयति कल्पन्त एवैन्द्रमेकादशकपालन्निर्वपेद् वैश्वदेवन्द्वादशकपालङ्ग्रामकाम इन्द्रञ्चैव विश्वाꣳश्च देवान्थ्स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवत्यैन्द्रस्यावदाय वैश्वदेवस्याव द्येदथैन्द्रस्यो ॥ [६०] ॥ परिष्टादिन्द्रियेणैवास्मा उभयतः सजातान् परि गृह्णात्युपाधाय्यपूर्वयँव्वासो दख्षिणा सजातानामुपहित्यै पृश्नियै दुग्धे प्रैयङ्गवञ्चरुन्निर्वपेन्मरुद्भ्यो ग्रामकामः पृश्नियै वै पयसो मरुतो जाताः पृश्नियै प्रियङ्गवो मारुताः खलु वै देवतया सजाता मरुत एव स्वेन भागधेयेनोप धावति त एवास्मै सजातान् प्र यच्छन्ति ग्राम्येव भवति प्रियवती याज्यानुवाक्ये ॥ [६१] ॥ भवतः प्रियमेवैनꣳ समानानाङ्करोति द्विपदा पुरोनुवाक्या भवति द्विपद एवाव रुन्धे चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे देवासुराः सँय्यत्ता आसन् ते देवा मिथो विप्रिया आसन् ते (१)ऽन्योऽन्यस्मै ज्यैष्ठ्यायातिष्ठमानाश्चतुर्द्धा व्यक्रामन्नग्निर् वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर् वरुण आदित्यैः स इन्द्रः प्रजापतिमुपाधावत् त ॥ [६२] ॥ मेतया संज्ञान्याऽयाजयदग्नये वसुमते पुरोडाशमष्टाकपालन्निरवपथ् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालँव्वरुणायाऽऽ*दित्यवते चरुन्ततो वा इन्द्रन्देवा ज्यैष्ठ्यायाभि समजानत यः समानैर् मिथो विप्रियः स्यात् तमेतया संज्ञान्या याजयेदग्नये वसुमते पुरोडाशमष्टाकपालन्निर्वपेथ् सोमाय रुद्रवते चरुमिन्द्राय मरुत्वते पुरोडाशमेकादशकपालँव्वरुणाया ऽऽ*दित्यवते चरुमिन्द्रमेवैनम्भूतं ज्यैष्ठ्याय समाना अभि सञ्जानते वसिष्ठः समानानाम्भवति ॥ [६३] ॥

(विशमेव तिष्ठन्त्येतामे वाथैन्द्रस्य याज्यानुवाक्ये तं वरुणाय चतुर्दश च) ॥ ११ ॥

हिरण्यगर्भ >१, आपो ह यत् >२, प्रजापते >३॥ स वेद पुत्रः पितरꣳ स मातरꣳ स सूनुर् भुवथ् स भुवत् पुनर्मघः। स द्यामौर्णोदन्तरिख्षꣳ स सुवः स विश्वा भुवो अभवथ् स आ*ऽभवत्॥ उदु त्यं >४, चित्रं >५॥ स प्रत्नवन्नवीयसाऽ*ग्ने द्युम्नेन सँय्यता। बृहत् ततन्थ भानुना॥ नि काव्या वेधसः शश्वतस्करुर्हस्ते दधानो ॥ [६४] ॥ नर्या पुरूणि। अग्निर् भुवद्रयिपती रयीणाꣳ सत्रा चक्राणो अमृतानि विश्वा॥ हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥ वाममद्य सवितर् वाममु श्वो दिवेदिवे वाममस्मभ्यꣳ सावीः॥ वामस्य

हि क्षय॑स्य देव॒ भूरे॑रया धि॒या वा॒मभाज॑ः स्याम। बडि॒त्था पर्व॑तानाङ्खि॒द्रम्बि॑भर्षि पृथिवि। प्र
या भूमि॑ प्रवत्वति म॒ह्ना जि॒नोषि॑ ॥ [६५] ॥ महिनि॥ स्तोमा॑सस्त्वा विचारिणि॒ प्रति॑ष्टोभन्त्य॒-
क्तुभि॑ः। प्र या वाज॒न्न हेष॑न्तम्पे॒रुमस्य॑स्यर्जुनि॥ ऋ॒दूदरे॑ण सख्या॑ सचेय॒ यो मा॒ न रिष्ये॑द्धर्यश्व
पी॒तः। अ॒यय्यँः सोमो॒ न्यधा॑य्यस्मे तस्मा॒ इन्द्र॑म्प्र॒तिर॑मे॒म्यच्छ॑॥ आपा॑न्तमन्युस्तृ॒पल॑प्रभर्मा॒
धुनि॒ः शिमी॑वा॒ञ्छरु॑माꣳ ऋजी॒षी। सोमो॒ विश्वा॑न्यत॒सा वना॑नि॒ नार्वागिन्द्र॑म्प्रति॒माना॑नि दे॒भुः॥
प्र ॥ [६६] ॥ सु॒वानः सोम॑ ऋतयुश्चि॒केतेन्द्रा॑य॒ ब्रह्म॑ ज॒मद॑ग्निरर्च॑न्न्। वृषा॑ य॒न्ताऽसि॒ शव॑स-
स्तु॒रस्या॒न्तर्य॑च्छ गृ॒णते ध॒र्त्रन्दृ॑ꣳह॥ स॒बाध॑स्ते॒ मद॑ञ्च शु॒ष्मय॑ञ्च॒ ब्रह्म॒ नरो॑ ब्रह्म॒कृत॑ः सपर्य॑न्न्।
अ॒र्को वा॒ यत् तु॒रते॒ सोम॑चक्षा॒स्तत्रेदिन्द्रो॑ दधते पृ॒त्सु तु॒र्याम्॥ वष॑ट् ते विष्णवा॒स आ कृ॑णोमि॒
तन्मे॑ जुषस्व शिपिविष्ट ह॒व्यम् ॥ [६७] ॥ वर्द्ध॑न्तु त्वा सुष्टु॒तयो॒ गिरो॑ मे यू॒यम्पा॑त स्व॒स्तिभि॑ः
सदा॑ नः॥ प्र तत् ते॑ अ॒द्य शि॑पिविष्ट॒ नामा॒ऽर्यः शꣳसामि व॒युना॑नि वि॒द्वान्। तन्त्वा॑ गृणामि
त॒वस॒मत॑वीया॒न् क्षय॑न्तम॒स्य रज॑सः परा॒के॥ किमित् ते॑ विष्णो परि॒चक्ष्य॑म्भूत् प्र यद्व॑वक्षे
शि॑पिवि॒ष्टो अ॑स्मि। मा वर्पो॑ अ॒स्मदप॑ गूह ए॒तद्यद॒न्यरू॑पः समि॒थे ब॒भूथ॑ ॥ [६८] ॥ अग्ने॒ दा
दा॒शुषे॑ र॒यिव्वी॒रव॑न्तम्परी॑णसम्। शिशी॒हि न॑ः सू॒नुम॑तः॥ दा नो॑ अग्ने श॒तिनो॒ दाः स॑ह॒स्रिणो॑ दु॒रो
न वाज॒ꣳ श्रुत्या॒ अपा॑ वृधि। प्राची॒ द्यावा॑पृथि॒वी ब्रह्म॑णा कृधि॒ सुव॒र्ण शु॒क्रमु॒षसो॒ वि दि॑द्युतुः॥
अ॒ग्निर् दा॒ द्रवि॑णँव्वी॒रपे॑शा अ॒ग्निर्ऋषि॒य्यँः सह॒स्रा स॒नोति॑। अ॒ग्निर् दि॒वि ह॒व्यमा त॑तानाग्नेर्
धामा॑नि॒ विभृ॑ता पुरु॒त्रा॥ मा ॥ [६९] ॥ नो॑ मर्धी >६, रा तू भ॑र >७॥ घृ॒तन्न पू॒तन्त॒नूर॑रे॒पाः
शुचि॒ हिर॑ण्यम्। तत् ते॑ रु॒क्मो न रो॑चत स्वधावः॥ उ॒भे सु॑श्चन्द्र स॒र्पिषो॒ दर्वी॑ श्रीणीष आ॒सनि॑।
उ॒तो न॒ उत् पु॑पूर्या उ॒क्थेषु॑ शवसस्पत॒ इष॒ꣳ स्तो॒तृभ्य॒ आ भ॑र॥ वायो॑ श॒तꣳ हरी॑णाय्युँवस्व॒
पोष्या॑णाम्। उ॒त वा॑ ते सह॒स्रिणो॒ रथ॒ आ या॑तु॒ पाज॑सा॥ प्र या॒भि ॥ [७०] ॥ यासि॑ दा॒श्वाꣳस॒-
मच्छा॑ नि॒युद्भि॑र् वायवि॒ष्टये॑ दुरो॒णे। नि नो॑ र॒यिꣳ सु॒भोज॑सय्युँवेह॒ नि वी॒रव॒द्गव्य॒मश्वि॑यञ्च॒ राध॑ः॥
रे॒वती॑र् नः सध॒माद॒ इन्द्रे॑ सन्तु तु॒विवा॑जाः। क्षु॒मन्तो॒ याभि॒र् मदे॑म॥ रे॒वाꣳ इद्रे॒वत॑ः स्तो॒ता
स्यात् त्वाव॑तो म॒घोन॑ः। प्रेदु॑ हरिवः श्रु॒तस्य॑ ॥ [७१] ॥

(दधा॑नो जि॒नोषि॑ दे॒भुः प्र ह॒व्यं ब॒भूथ॒ मा या॒भि॒ श्चत्वारि॑ꣳशच्च) ॥ १२ ॥

## समाप्ति कोर्वैः

(प्रजापतिस्ताः सृष्ट्वा अग्नये पथिकृते ग्नये कामाया ग्नयेन्नवते वैश्वानर मादित्यञ्चरु मैन्द्रञ्चरु मिन्द्रायान्वृजव आग्नावैष्णव मसौ सोमारौद्र मैन्द्र मेकादशकपालꣳ हिरण्यगर्भो द्वादश)
(प्रजापति रग्नये कामाया ऽभि सम्भवतो यो विद्विषाणयो रिध्मे सन्न ह्ये दाग्नावैष्णवमु परिष्टा द्यासि दाश्वाꣳस मेकसप्ततिः)
(प्रजापतिः प्रेद्धु हरिवः श्रुतस्य)

॥ हरिः ॐ ॥

द्वितीयकाण्डे द्वितीयः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १२ | ७१ |

ॐ